**अग्निरक्षण** न० अग्निः रक्ष्यतेऽनेनात्र वा रक्ष–ल्युट् । राक्षसादिभ्योऽग्निरक्षाकारके मन्त्रभेदे, अग्निहोत्रे, अग्निहोत्रगृहे च । भावे ल्युट् । अग्न्याधाने ।

**अग्निरजस्** पु० अग्निरिव रज्यते दीप्यते रन्ज् असुन् नलोपः । रक्तवर्णे इन्द्रगोपनामककीटे । ६त० । अग्निवीर्य्ये, स्वर्णे च न० ।

**अग्निरहस्य** त्रि० अग्नेः रहस्यं तदुपासनाद्यङ्गजातमत्र । अनलोपसनाबोधके शास्त्रे अग्निकल्पे ।

**अग्निरुहा** स्त्री अग्निरिव रोहति रुह–क । मांसादन्यां तदङ्कुरस्य वह्नितुल्यवर्णतयोत्पन्नत्वात् तथात्वमस्याः ।

**अग्निरूप** त्रि० अग्नेरिव रूपं वर्णोऽस्य, अग्निरिव रूप्यतेऽसौ रूप–कर्म्मणि अच् वा । वह्नितुल्यवर्णे अग्निसदृशमान्ये च ६त० । अग्नेर्वर्णे अग्निशब्दोक्ते वह्नेर्ध्येयरूपे च न० ।

**अग्निरेतस्** न० ६त० । अग्निशुक्रे, तज्जातत्वात् सुवर्णे च तत्कथा च प्रस्कन्नरुद्रशुक्रस्य अग्निसंक्रान्तस्याग्निना देवताप्रार्थनया गङ्गयामाहितस्य तया च वोढुमसमर्थया “समुत्ससर्ज्ज तं गर्भं मेरौ गिरिवरे तदेत्यनेन” मेरौ पातने कृते तस्य तेजसैव मेरुस्थं सर्व्वं वस्तु सुवर्णीकृतं यथोक्तमानुशासनिके प० भा० । “तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्व्वतेषु च । तत् सर्व्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत” इति । अन्ते च “तस्मात् सुवर्णं माङ्गल्यं रत्नानामुत्तमोत्तमम् । सहजं कार्त्तिकेयस्य वह्नेस्तेजः परं मतमिति” ८६ अध्याये ।

**अग्निलोक** पु० ६त० । अग्न्यधिष्ठिते मेरुशृङ्गाधःस्थे भुवनभेदे । स च । ‘सद्रत्नकाञ्चनमयं शिखरत्रयं च मेरोस्सुरारिकपुरारिपुराणि तेषु । तेषामधःशतमखज्वलनान्तकानां रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ” इति सि० शि० गोलाध्याये दर्शितः । अयमेव पक्षः युक्तियुक्तः । पुराणे तु अन्तरीक्षएव तस्य स्थितिरुक्ता । काशीखण्डे, विमानयानेन गच्छता शिवशर्म्मणा पृष्टाभ्यां विष्णुदूताभ्यां सूर्य्यलोकादूर्द्ध्वं शक्रपुरीवर्णनोत्तरं तद्दक्षिणस्याम् अग्निलोको वर्णितः यथा

“एतस्या दक्षिणे भागे येयं पूर्दृश्यते शुभा । इमामर्च्चिष्मतीं पश्य वीतिहोत्रपुरीं शुभाम् । जातवेदसि ये भक्तास्ते वसन्त्यत्र सुव्रताः । अग्निप्रवेशं कुर्य्युर्ये दृढसत्त्वा जितेन्द्रियाः । स्त्रियो वा सत्वसम्पन्नास्ते सर्व्वेऽत्राग्नितेजसः । अग्निहोत्ररताविप्रास्तथाग्निब्रह्मचारिणः । पञ्चाग्निव्रतिनो ये वै तेऽग्निलोकेऽग्नितेजसः । शीते शीतापनुत्त्यै यस्त्विध्मभारान् प्रयच्छति । कुर्य्यादग्नीष्टिकां वापि स वसेदग्निसन्निधौ । अनाथस्याग्निसंस्कारं यः कुर्य्याद्वा दयान्वितः । अशक्तः प्रेरयेदन्यान् सोऽग्निलोके महीयते । जठराग्निविवृद्ध्यै यो दद्यादाग्नेयमौषधम् । मन्दाग्नये स पुण्यात्मा वह्निलोके वसेच्चिरम् । यज्ञोपस्करवस्तूनि यज्ञार्थं द्रविणन्तु वा । यथाशक्ति प्रदद्याद्यो ह्यर्च्चिष्मत्यां वसेत् स वै । अग्निरेको द्विजातीनां निःश्रेयसकरः परः । गुरुर्देवो व्रतं तीर्थं सर्व्वमग्नेर्विनिश्चितम् । अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित् । पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः । अपि वेदं विदित्वा यस्त्यक्ता वै जातवेदसम् । अन्यत्र बध्नाति रतिं ब्राह्मणो न स वेदवित् । अन्तरात्मा ह्ययं साक्षान्निश्चितो ह्याशुशुक्षणिः । मांसग्रासान् पचेत् कुक्षौ स्त्रीणां नो मांसपेशिकाम् । तैजसी शाम्भवी मूर्त्तिः प्रत्यक्षा दहनात्मिका । कर्त्री हन्त्री पालयित्री विनैनां किं विलोक्यते । चित्रभानुरयं साक्षान्नेत्रं त्रिभुवनेशितुः । अन्धन्तमोमये लोके विनैनङ्कः प्रकाशकः । धूपप्रदीपनैवेद्यपयोदधिघृतेक्षवम् । एतद्भुक्तं निषेवन्ते सर्व्वे दिवि दिवौकसः” इति ।

**अग्निवत्** त्रि० अग्निरस्त्यस्य अग्नि+मतुप् वेदे मस्य वः । साग्निके विप्रे, “यपुर्ययस्तु चरुरग्निवाँ इव” इति वेदः । तुल्यार्थे वति । अग्नितुल्यक्रियायादौ अव्य० ।

**अग्निवधू** स्त्री ६त० । स्वाहायाम् दक्षकन्यायाम् । अग्नायीशब्दे विवरणं द्रष्टव्यम् ।

**अग्निवर्च्चस्** त्रि० अग्नेर्वर्च्च इव वर्च्चो दीप्तिरस्य । अग्नितुल्यदीप्तिमति, “स्यन्दनेनाग्निवर्चसा” इति भार० । ६त० । अग्नितेजसि न० ।

**अग्निवर्द्धक** त्रि० अग्नेर्जठरानलस्य वर्द्धकः वृध+णिच्–ण्वुल् । जठराग्न्युद्दीपके औषधभेदे, पथ्याहारे च ।

**अग्निवर्ण** त्रि० अग्नेर्वर्ण इव वर्णो रूपं यस्य । अग्नितुल्यवर्णे, “ब्राह्मणस्तु सुरां पीत्वा अग्निवर्णां सुरां पिबेदिति” स्मृतिः । सूर्य्यवंश्ये नृपतिभेदे पु० तत्कथा रघौ १९स० । ६त० । अग्नेः रूपे पु० । [अग्निप्रिये त्रि० ।

**अग्निवल्लभ** पु० अग्नेर्वल्लभः सुखेन दाह्यत्वात् । सालवृक्षे ।

**अग्निवासस्** न० अग्निरिव शुद्धं वासो वस्त्रम् । अग्नितुल्यशुद्धे वस्त्रे । ६ब० । तादृग्वस्त्रवति त्रि० ।

**अग्निवाह** पु० अग्निं वाहयति गमयति अनुमापयति वा वाहिः अण् । छागे, धूमे च । वह्निवाहकमात्रे त्रि० ।